संस्कृत-वार्ता:

28/11/2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· विकसितभारतस्य मार्गः जनानां ऐक्ये निहितः अस्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना गोवा-नगरस्य सार्ध पञ्चशततमे मानोत्सवमठे भक्तान् सम्बोधयन् उक्तम्।

· प्रधानमन्त्रिणा नरेन्द्रमोदिना भारतं स्वावलम्बीकर्तुं नव मन्त्राः प्रदत्ताः; सः उडुपी-नगरस्य श्रीकृष्णमठे लक्षकण्ठगीतापारायणकार्यक्रमे च भागम् अगृह्णात्।

· राष्ट्रपतिः द्रौपदी मुर्मुः उक्तवती, यत् समाजं अधिकसमावेशयुतं, शान्तियुतं, स्वस्थं, मूल्य-आधारितं च कर्तुं सर्वकारेण अनेकानि पदोत्थापितानि सन्तीति।

· द्वितीयत्रैमासिके भारतेन प्रायः सपादाष्टप्रतिशतं जी. डी. पी. इत्यस्य वृद्धिः अभिलिखितास्ति।

· दितवाह-चक्रवातः तमिळनाडु-पुदुच्चेरी-तटं प्रति गच्छन् अस्ति; प्रधानमन्त्रिणा नरेन्द्रमोदिना श्रीलङ्कादेशस्य जनान प्रति शोकसंवेदना प्रकटिता।

<u>प्रधानमंत्री-गोवा</u>

विकसितभारतस्य मार्गः जनानां ऐक्ये निहितः अस्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। प्रधानमन्त्री अवदत् यत् अनेकाः कठिनपरिस्थितयः सम्मुखीकृत्य अपि गोवा-राज्यं न केवलं स्वस्य मूलसंस्कृतेः संरक्षणम् अकरोत्, अपितु कालान्तरे तस्य पुनरुज्जीवनम् अपि अकरोत्। गोवाराज्यस्य कानकोना-नगर-समीपस्थस्य श्रीसंस्थान-गोकर्णपरतगलि-जीवोत्तम्-मठस्य सार्ध-पञ्चशततम-मानोत्सवे भक्तानां समागमं सम्बोधयन्, सः समाजाय चिरस्थायी-योगदानाय ऐतिहासिक-मठस्य प्रशंसाम् अकरोत्।

2100 pm modi viksit bharat

श्रीमोदीः अवदत् यत् एषा संस्था न केवलं आस्थायाः, अपितु मानवतायाः संस्कृतेः च रक्षणम् करोतीति। प्रधानमन्त्रिणा परतगली इत्यत्र प्रभुश्रीरामस्य सप्तसप्तति फिटमितस्य कांस्यप्रतिमायाः अनावरणं कृतम्।

पी. एम.-कर्नाटका

प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्रिय-कार्याय समर्पितान् नव-संकल्पान् प्रति नागरिकाणां प्रतिबद्धता प्रार्थिता। अद्य उडुपी-नगरे श्रीकृष्ण-मठस्य भक्तान् सम्बोधयन्, सः जलस्य, नद्याश्च संरक्षणाय, एक-पेड़-मां-के-नाम इत्यस्य भागः भवितुं, न्यूनातिन्यूनं एकस्य दरिद्रस्य उत्थानाय, अस्माकं अर्थव्यवस्थायाः उद्यमशीलानाञ्च रक्षणाय, स्वदेशी-आन्दोलनेत्यस्य प्रोत्साहनाय साधूनां, भक्तानां, नागरिकाणाञ्च समर्थनं याचितवान्। सः जनान् प्राकृतिककृषिं प्रोत्साहयितुं, बृहन्धान्यानां उपयोगेन स्वस्थ-जीवनशैल्याः अनुसरणं कर्तुं, तैलस्य उपयोगं न्यूनीकर्तुं, योगम् दैनन्दिनजीवनस्य भागरूपेण स्वीकर्तुं च आहूयत्।

प्रधानमन्त्रिणा भारतीयाः स्वपरम्परायै प्रसिद्धानि पञ्चविंशति स्थानानि द्रष्टुमपि आवाहिताः। भगवतः कृष्णस्य उपदेशैः युक्ता भगवद्गीता केन्द्रसर्वकारस्य अधिकांशकार्यक्रमाणां प्रेरणा अस्ति इति सः अवदत्।

अद्य उडुपी-नगरस्य श्रीकृष्णमठस्य यात्रावधौ सः गीतीपारायणम् इति नाम्ना प्रसिद्धस्य भगवद्गीतायाः समूहपाठस्य भागः आसीत्। सः स्वर्णप्रलेपितं तीर्थमण्डपं उद्घाटितवान् तथा च स्वर्णप्रलेपितं कनककिण्डी इति पवित्रं द्वारमपि समुद्घाटितवान्, यस्य विषये मान्यतास्ति यत् भगवता कृष्णेन आत्मनः भक्ताय सन्तकनकदासाय उद्घाटितमासीदिति।

प्रधानमन्त्री-बालविवाहः

प्रधानमन्त्रिणा नरेन्द्रमोदिना अद्य प्रोक्तं यत् भारतं स्पष्टनीतिभिः, निरन्तरकार्यैः, सशक्तप्रयासैश्च बालविवाहस्य उन्मूलनार्थं कार्यं करोति। महिला–बाल–विकास–मन्त्री अन्नपूर्णा देवी इत्यनया “बालविवाहस्य अन्त्यस्य उपायाः” इति विषये लिखितं लेखं सामाजिक-प्रसार-माध्यमेषु प्रसारयन्

प्रधानमन्त्री एतत् समुल्लिखितवान्। स्वकीये लेखे मन्त्रिणा बालविवाहमुक्त-भारतस्य आवाहनं कृतमासीत्।

राष्ट्रपतिः/लखनऊ

राष्ट्रपतिपदासीना द्रौपदी मुर्मुः अद्य अवदत् यत् भारतसर्वकारः समाजं अधिकसमावेशीति भावयुतं शान्तियुतं, स्वस्थं, मूल्याधारितञ्च कर्तुं अनेकानि महत्त्वपूर्णानि पदानि समुत्थापयन्नस्तीति। ब्रह्माकुमारीति समूहस्य अस्य वर्षस्य वार्षिकध्येयबिन्दुत्वेन 'वैश्विक-एकतायै विश्वासाय च ध्यानम्' इत्यस्य उद्घाटनावसरे राष्ट्रपतिः उक्तवती यत् वैश्विकरूपेण योगस्य, ध्यानस्य च प्रोत्साहनाय, अन्ताराष्ट्रिय-योगदिवसाभियानस्य नेतृत्वादयः च एतादृशाः उपक्रमाः सन्तीति। सा उक्तवती यत् भारतस्य प्राचीना संस्कृतिः सर्वदा जगते 'वसुधैवकुटुम्बकम्' इत्यस्य सन्देशम् अददात् इति। अद्यत्वे, यदा विश्वं बहूनां समस्यानां सम्मुखीकरणं करोति, तदा एते विचाराः इतोऽपि प्रासङ्गिकाः भवन्ति।

अपराह्णे राष्ट्रपतिः भारत-स्काउट्स्-एण्ड्-गाइड्स् इत्यस्य हीरकजयन्त्योत्सवस्य समापनसमारोहे भागम् अगृह्णात्।

जीडीपी-दत्तांशः

देशस्य सकल-देशीयोत्पादः वार्तमानिक- वित्तवर्षस्य द्वितीय-त्रैमासिके दशमलवद्वि-उत्तराष्टप्रतिशतं प्रबलं वृद्धिम् प्राप्तवानिति अभिलिखतमस्ति। विषयेऽस्मिन् प्रधानमन्त्रिणा स्वकीये सन्देशे प्रसन्नता प्रकटिता।

दितवाह-चक्रवातः

भारत-ऋतु-विज्ञान-विभागेन बंगालखातस्य दक्षिण-पश्चिमभागे उत्पन्नं दितवाह-चक्रवातम् आलक्ष्य पुडुच्चेरी-क्षेत्राय संचेतना प्रसारितास्ति। अरक्कोणम इत्यतः षष्टिजनानां राष्ट्रिय-आपदुद्धारबलम् अद्य पुडुच्चेरीम् समागत्य मण्डलाध्यक्षम् अमिलत्। उद्धारकार्याय साहाय्यकार्याय च तटीय-नदी-क्षेत्रेषु च दलानि नियोजितानि भविष्यन्ति। केरल-राज्यं प्रति अपि दलमेकं प्रेषितमस्ति। चक्रवातः सप्ततः दश-किलोमीटरमित- प्रतिहोरायाः वेगेन तमिलनाडु-तटं प्रति गतिशीलः अस्ति। ऋतु-विभागानुसारेण, एतत् कराईकल-नगरात् विंशत्यधिक त्रिशतं

किलोमीटरमिते दक्षिणपूर्वदिशि, चैनल इत्यस्मात् त्रिंशत्यधिक पञ्चशतं किलोमीटरमिते च दक्षिणदिशि अस्ति। प्रधानमन्त्री नरेन्द्र-मोदी श्रीलङ्का-देशस्य प्रजाः प्रति शोकं प्रकटितवान्, दितवाह्-चक्रवातेन पीडित-परिवाराणां सुरक्षां शीघ्र-स्वास्थ्य-लाभाय च सः प्रार्थितवान्।

भारतदेशः आपरेशन्-सागर-बन्धु इत्यस्यान्तर्गतं तत्क्षणमेव उपशमनसामग्रीः मानवीयसहाय्यञ्च प्रेषितवान्, इतोऽपि साहाय्यं कर्तुं सज्जः अस्तीति।

<u>जलशक्ति शिखर सम्मेलनः</u>

जलशक्ति-मन्त्री सी. आर. पाटिलः अद्य अवदत् यत् जलजीवन-मिशन् इत्यस्यान्तर्गतं सम्पूर्णे देशे पञ्चदश-कोटि-ग्रामीण-गृहेभ्यः नल-जल-सम्पर्कः प्रदत्तोऽस्तीति। नवदेहल्यां सुजलम्-भारत-शिखरसम्मेलनम् सम्बोधयन् श्री पाटिलः प्रत्येकस्य नागरिकस्य सुस्थिरजलसुरक्षां सुनिश्चयाय सर्वकारस्य प्रतिबद्धतां पुनरुद्घाटितवान्। सः अवदत् यत्, एतत् शिखरसम्मेलनं जलसंरक्षणार्थं वैज्ञानिक-सुस्थिर-दृष्टिकोणस्य निर्माणार्थं समग्र-राष्ट्रव्यापीप्रयासस्य भागः अस्तीति। आकाशवाण्या सह विशेषरूपेण चर्चां कुर्वन् जलशक्ति-मन्त्री अवदत् यत् सुजलमित्यभियानस्य साहाय्येन स्वतन्त्रतायाः शतवार्षिक्यं यावत् भारतं विकसितराष्ट्रं भविष्यतीति।

<u>यू पी आधार प्रमाणः</u>

उत्तरप्रदेश-सर्वकारः स्पष्टीकृतवान् यत् आधार-पत्राणि जन्मप्रमाणपत्ररूपेण अथवा जन्मदिनाङ्कस्य प्रमाणरूपेण स्वीकृताः न भविष्यन्ति। आधार-पत्रे किमपि आधिकारिकतया प्रमाणीकृत: जन्माभिलेखः नास्ति, अतः व्यक्तेः जन्मविवरणं स्थापयितुं प्रामाणिकलेखरूपेण न मन्यते इति राज्यस्य योजना-विभागेन अधोरेखनानन्तरं निर्देशः प्रसारितोऽभवत्।

।। इति वार्ताः ।।